पृथिवी ॥ (नदीविशेषः । यथा, मात्स्ये । ११४ । २२ ।
"कौशिकी तु तृतीया च निश्चला गण्डकी तथा ।
इक्षुर्लौहितमित्येता हिमवत्पार्श्वनिःसृताः ॥")
अचले, त्रि । यथा,—
"निवसतु तव गेहे निश्चला सिन्धुपुत्री ॥"
इत्याद्युद्भटः ॥

निश्चलाङ्गः, पुं, (निश्चलवत् अङ्गं यस्य ।) वकः । इति राजनिर्घण्टः ॥ पर्व्वतादिः । स्पन्दरहिते, त्रि ॥

निश्चायकः, त्रि, (निश्चिनोतीति । निर् + चि + ण्वुल् ।) निश्चयकर्त्ता । निर्णायकः । यथा, अनुपाधित्वनिश्चायकदशागतत्वं न हेतुत्वमिति व्याप्तिपञ्चमाथुरी ॥

निश्चारकः, पुं, (निश्चरतीति । निर् + चर + ण्वुल् ।) पुरीषचयः । वायुः । स्वच्छन्दम् । इति मेदिनी । के, १६५ ॥

निश्चिन्तः, त्रि, (निर्गता चिन्ता यस्मात् ।) चिन्तारहितः । यथाह कश्चित् ।
"मूर्खत्वं सुलभं भजस्व कुमते ! मूर्खस्य चाष्टौ गुणा
निश्चिन्तो बहुभोजकोऽतिमुखरो रात्रिन्दिवा स्वप्नभाक् ।
कार्य्याकार्य्यविचारणाविरहितो मानापमाने समे
दृष्टा सर्व्वजनस्य मूर्द्ध्नि चरणौ मूर्खश्चिरं जीवतु ॥"

निश्चीयमानः, त्रि, (निर् + चि + कर्म्मणि शानच् ।) निश्चयविषयः । यथा । ननु तथापि एवकारस्य निश्चीयमानस्यैव सार्थकत्वाभावात् कुतः प्रशस्तत्वमिति शब्दशक्तिप्रकाशिकाटीकायां रामभद्रः ॥

निश्चुक्कणं, क्ली, (निःशेषेण चुक्कणम् ।) दन्तशाणम् । इति त्रिकाण्डशेषः ॥ मिशी इति भाषा ॥

निश्चेष्टः, त्रि, (निर्गता चेष्टा यस्मात् ।) चेष्टारहितः । निश्चेष्टितः । यथा,—
"गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः ।
अव्यक्तरावो न्यपतत् सहवालो व्यसुर्व्रजे ॥"
इति श्रीभागवते दशमः ॥

निश्वासः, पुं, (नि + श्वस + भावे घञ् ।) बहिर्मुखश्वासः । तत्पर्य्यायः । प्राणः २ एतनः ३ । इति हेमचन्द्रः ॥ (यथा, ब्रह्मवैवर्त्ते । २।१।८६ ।
"संवर्त्तं सर्व्वब्रह्माण्डं शश्वत् निःश्वाससमाप्ततः ॥")

निश्वाससंहिता, स्त्री, (निश्वासाख्या संहिता ।) शिवप्रणीतशास्त्रविशेषः । यथा,—
"एवमभ्यर्थितस्तेषु पुराहं द्विजसत्तमाः ।
वेदक्रियासमायुक्तां कृतवानस्मि संहिताम् ॥
निश्वासाख्यां ततस्तस्यां लीना वाभ्रव्यशाण्डिलाः ।
निश्वाससंहितायां हि लक्षमात्रप्रमाणतः ॥
सैव पाशुपती दीक्षा योगः पाशुपतस्य हि ।
एतस्मादेव मार्गाद्धि यदन्यदिह जायते ॥
तत् क्षुद्रकर्म्म विज्ञेयं रौद्रं शौचविवर्ज्जितम् ॥"
इति वराहपुराणम् ॥

निषङ्गः, पुं, (नितरां सजन्ति शरा यत्र । नि + सन्ज + अधिकरणे घञ् ।) तूणीरः । इत्यमरः । २ । ८ । ८८ ॥ (यथा, रघुः । २ । ३० ।
"ततो मृगेन्द्रस्य मृगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः ॥")
सङ्गः । इति मेदिनी । गे, ४० ॥

निषङ्गथिः, पुं, (नि + सन्ज + "नौ सञ्जेर्घथिन् ।" उणा । ४ । ८७ । इति भावे घथिन् । षित्वात् कुत्वम् । ततः षत्वम् ।) समालिङ्ग. । आलिङ्गनम् । इत्युणादिकोषः । १ । १६१ ॥ धन्वी । रथः । स्कन्धः । हयम् । सारथिः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (आलिङ्गके, त्रि । इत्युज्ज्वलदत्तः ॥)

निषङ्गी, [न्] पुं स्त्री, (निषङ्गोऽस्यस्येति । निषङ्ग + इनिः ।) धनुर्धरः । इत्यमरः । २ । ८ । ६९ ॥ (यथा, रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ॥"
स्वनामख्यातो धृतराष्ट्रपुत्रः । इति महाभारतम् । १ । ११७ । ११ ॥)

निषण्णः, त्रि, (निषीदति स्मेति । नि + षद् + गत्यर्थेति क्तः । "रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः ।" ८ । २ । ४२ । इति निष्ठातस्य धातोर्दकारस्य च नः ।) उपविष्टः । यथा,—
"पादावनुचयन्ती श्रीर्देवस्याचरणान्तिके ।
निषण्णा पङ्कजे पुण्या नमो देव्यै श्रिया इति ॥"
इति तिथ्यादितत्त्वम् ॥

निषण्णकं, क्ली, (निषण्ण + संज्ञायां कन् ।) सुनिषण्णकम् । इति शब्दरत्नावली ॥

निषदः, पुं, (निषीदन्ति षड्जादयः स्वरा यत्र । नि + सद् + बाहुलकात् अप् ।) निषादस्वरः । इत्यमरटीकायां स्वामी ॥ (स्वनामख्यातनृपविशेषः । यथा, महाभारते । २ । ९ । १५ ।
"भङ्गासुरिः सुनीथश्च निषदोऽथ महीश्वरः ॥")

निषद्या, स्त्री, (निषीदन्त्यस्यामिति । नि + षद + "संज्ञायां समजनिषदेति ।" ३ । ३ । ९९ । इति अधिकरणे क्यप् ।) पण्यविक्रयशाला । इत्यमरः । २ । २ । २ ॥ हट्टः । इत्यन्ये । इति भरतः ॥ क्षुद्रखट्वा । इति त्रिकाण्डशेषः ॥

निषद्वरः, पुं, (निषीदन्ति विषण्णा भवन्ति जना अत्रेति । नि + सद विषादे गतौ + "नौ सदेः ।" उणा । २ । १२४ । इति ष्वरच् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) कर्द्दमः । इत्यमरः । १ । १० । ९ ॥

निषद्वरी, स्त्री, (नि + सद विषादे + अधिकरणे ष्वरच् । षित्वात् ङीप् ।) रात्रिः । इति मेदिनी । रे, २७३ ॥

निषधः, पुं, पर्व्वतविशेषः । इत्यमरः । २ । ३ । ३ ॥ स तु इलावृतस्य दक्षिणे हरिवर्षस्य सीमापर्व्वतः । प्रागायतः अयुतयोजनोत्सेधः । द्विसहस्रयोजनविस्तीर्णः । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥ कठिनम् । देशविशेषः । (यथा, महाभारते । ३ । ५३ । ३ ।
"ब्रह्मण्यो वेदवित् शूरो निषधेषु महीपतिः ॥")
तद्देशीयराजः । इति मेदिनी । धे, १३ ॥ निषादस्वरः । इति हेमचन्द्रः । ६ । ३७ ॥ (रामप्रपौत्रे कुशवंशीयनृपभेदे । यथा, हरिवंशे । १५ । २६ ।
"रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः ।
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ॥")

निषादः, पुं, (निषद्यते ग्रामशेषसीमायाम् । यद्वा, निषीदन्ति पापमत्र । नि + सद् + कर्म्मणि अधिकरणे वा घञ् ।) चण्डालः । इत्यमरः । २ । १० । २० ॥ वेणशरीरोद्भवजातिविशेषः । यथा, अग्निपुराणे ।
"मथ्यमाने ततो राज्ञस्तस्मिन्नूरौ प्रजायत ।
ह्रस्वोऽतिपुरुषः कृष्णस्तद्भयात् प्राञ्जलिः स्थितः ॥
तं मन्त्रैर्विह्वलं दृष्ट्वा निषीदेत्यब्रुवंस्तदा ।
निषादवंशकर्त्ता स बभूव मुनिसत्तमाः ! ॥
धीवरानसृजत् चापि वेणकल्मषसम्भवान् ।
ये चान्ये विन्ध्यनिलयाः शवर नाहलादयः ॥
अधर्म्मरुचयो ये च विद्ध्येतान् वेणसम्भवान् ॥"
पारिभाषिकचण्डालो यथा, मार्कण्डेयपुराणे ।
"आशाकर्त्तुश्च दाता च दातुश्च प्रतिषेधकः ।
शरणागतं यस्त्यजति स चण्डालोऽधमो नरः ॥"
धीवरविशेषः । इति मेदिनी । दे, ३४ ॥ (निषीदन्ति षड्जादयः स्वरा यत्र । नि + षद् + घञ् ।) सप्तस्वरान्तर्गतशेषस्वरः । स तु नारदमते हस्तिस्वरतुल्यस्वरः । अस्योच्चारणस्थानं ललाटम् । व्याकरणमते दन्ताः । अयं वैश्यवर्णः । सर्व्वस्वराणां मध्ये उच्चः । अस्य जातिः सम्पूर्णा । अस्य कूटतानाः ५०४० । प्रत्येकतानम् ५६ समुदायेन २८२२४० भवन्ति । अस्य स्वरूपः गणेशतुल्यः । लघ्वश्वेतवर्णः । स्थानं पुष्करद्वीपः । देवता सूर्य्यः । वारः शनिः । समयः निशान्ते ८ दण्ड—१४ पलानि । अस्य श्रुतिः उग्रा क्षोभिणी च । मूर्च्छना मन्द्रस्थाने सखा । मध्यस्थाने अलङ्कृता । तारस्थाने लोचना च । निषादवर्ज्जिता रागिणी आसावरी मल्लारी च । नादपुराणमते । निःसन्धानोऽयम् । वीणायां धैवतावधिषड्जस्थानपर्य्यन्तं प्रथमसप्तकतृतीयांशस्य शेषसमुदायवीणातन्त्रीनिषादस्थानं भवति । इति सङ्गीतशास्त्रम् । * ॥
"षड्जादयः यतोऽत्र स्वराः सर्व्वे मनोहराः
निषीदन्ति यतो लोके निषादस्तेन कथ्यते ॥
चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः ।
ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके ॥"
इति सङ्गीतदामोदरः ॥
(अस्य असुरवंशे उत्पत्तिः । वैश्यो जातिः । विचित्रो वर्णः । पुष्करद्वीपे जन्म । ऋषिस्तुम्बुरुः । सूर्य्यो देवता । जगती छन्दः । करुणे उपयोगित्वम् ॥ इति सङ्गीतदर्पणम् ॥)